22E

# टिळक महाराष्ट्र विद्यापीठ, पुणे

## संस्कृत पारंगत (एम.ए.) बहि:स्थ

## परीक्षा: डिसेंबर – २०२३

## सत्र १ ले

### विषय: भरतनाट्यशास्त्र (22E314)

**दिनांक: १४/१२/२०२३** **गुण : १००** **वेळ : स. १०.०० ते १.००**

**सूचना:** १) उजवीकडील अंक त्या प्रश्नांचे गुण दर्शवितात. २) सर्व प्रश्न सोडवणे अनिवार्य.

**प्र. १. मातृभाषया षण्णामनुवादं कुरुत।** **(३०)**

१. इह प्रेक्ष्यागृहं दृष्ट्वा धीमता विश्वकर्मणा । त्रिविधः सन्निवेशश्च शास्त्रतः परिकल्पितः ।।
विकृष्टश्चतुरश्रश्च त्र्यश्रश्चैव तु मण्डपः । तेषां त्रीणि प्रमाणानि ज्येष्ठं मध्यं तथाऽवरम् ।।

२. देवानां वचनं श्रुत्वा ब्रह्मा विघ्नानुवाच ह । कस्माद्भवन्तो नाट्यस्य विनाशाय समुत्थिताः ।।
ब्रह्मणो वचनं श्रुत्वा विरूपाक्षोऽब्रवीद्वचः । दैत्यैर्विघ्नगणैः सार्धं सामपूर्वमिदं ततः ।।

३. ब्रह्मा कुटिलकं चैव भृङ्गारं वरुणः शुभम् । सूर्यश्छत्रं शिवस्सिद्धिं वायुर्व्यजनमेव च ।।
विष्णुः सिंहासनं चैव कुबेरो मुकुटं तथा । श्राव्यत्वं प्रेक्षणीयस्य ददौ देवी सरस्वती ।।

४. चतुर्हस्तो भवेद्दण्डो निर्दिष्टस्तु प्रमाणतः । अनेनैव प्रमाणेन वक्ष्याम्येषां विनिर्णयम् ।।
चतुःषष्टिकरान्कुर्याद्दीर्घत्वेन तु मण्डपम् । द्वात्रिंशतं च विस्तारन्मर्त्यानां यो भवेदिह ।।

५. श्रुत्वा तु शक्रवचनं मामाहाम्बुजसम्भवः । त्वं पुत्रशतसंयुक्तः प्रयोक्ताऽस्य भवानघ ।।
आज्ञापितो विदित्वाहं नाट्यवेदं पितामहात् । पुत्रानध्यापयामास प्रयोगं चापि तत्त्वतः ।।

६. तेषां तु वचनं श्रुत्वा मुनीनां भरतो मुनिः । ततो वाक्यं नाट्यवेदकथां प्रति ।।
भवद्भिः शुचिभिर्भूत्वा तथाऽवहितमानसैः । श्रूयतां नाट्यवेदस्य सम्भवो ब्रह्मनिर्मितः ।।

७. सर्वशास्त्रार्थसम्पन्नं सर्वशिल्पप्रवर्तकम् । नाट्याख्यं पञ्चमं वेदं सेतिहासं करोम्यहम् ।।
एवं सङ्कल्प्य भगवान् सर्ववेदाननुस्मरन् । नाट्यवेदं ततश्चक्रे चतुर्वेदाङ्गसम्भवम् ।।

**प्र. २. ससन्दर्भं चतुर्णां स्पष्टीकरणं लिखत ।** **(३२)**

१. भूमैर्विभागं पूर्वं तु परीक्षेत प्रयोजकः ।
२. दीयतां भगवन्द्रव्यं कैशिक्याः सम्प्रयोजकम् ।
३. अशक्ता भगवन् देवा अयोग्या नाट्यकर्मणि ।
४. अनिस्सारणधर्मत्वाद्विस्वरत्वं भृशं व्रजेत् ।
५. समुन्नतं समं चैव रङ्गशीर्षं तु कारयेत् ।

**प्र.३. टिपण्णीद्वयं लिखत।** **(२०)**

१. रंगशीर्षम्
२. नाट्यं भावानुकीर्तनम्
३. स्तम्भस्थापनरक्षाविधिः

**प्र. ४. एकं सविस्तरं लिखत।** **(१८)**

१. नाट्यवेदस्य पञ्चमवेद इति नामाभिधानं विवेचयत।
२. भरतमुनेः परिचयं लिखित्वा लेखनवैशिष्ट्यानि स्पष्टीकुरुत।

------------